हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-97 | 1 | फरवरी 05 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ हेमन्तऋतुः
सूर्यदक्षिणायनम् माघ शुक्लपक्षः अष्टमी
तिथिः माघ 23 प्रविष्टांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशे भाषा-गणितयोः शिक्षायाः स्तरः वर्धितः, शिक्षामंत्रिणे समर्पिता ASER प्रतिवेदनम्

3 कृषिक्षेत्रे अनियमिततां भ्रष्टाचारविरुद्धं च उचितं कार्याचरणम् भविष्यति- कृषिमन्त्रीशिवराजसिंहचौहानः

4 संगीतस्य कोऽपि भेदः नास्ति। संगीतम् आत्मनः समीपतमं मन्यते। सुधासाठ्ये मुम्बई

## षड्पञ्चाशल्लक्षाधिकैककोटितोप्यधिक मतदातारः करिष्यन्ति देहल्याः नेतृणां भाग्यस्य निर्धारणम्

हिमसंस्कृतवार्ताः। अद्य आयोक्ष्यमाने सप्तति-सदस्यात्मिकायाः दिल्लीविधानसभायाः निर्वाचनं सुचारुरूपेण सम्पादयितुं सर्वाः सज्जताः पूरिताः सन्ति। मतदानं प्रातः सप्तवादनादारभ्य सायं षड्वादनं यावत् प्रचलिष्यति। षड्पञ्चाशल्लक्षाधिकैक कोटितोप्यधिक मतदातारः स्वमताधिकाराणां प्रयोगं करिष्यन्ति। दिल्लीविधानसभायां भाजपा, आम आदमी पार्टी, काङ्ग्रेस इत्येतेषु मध्ये त्रिपक्षीयस्पर्धा दृश्यते। विधानसभानिर्वाचने नवनवत्यधिक षड्शतं यावत् प्रत्याशिनः नैर्वाचनिक-समराङ्गणे सन्ति। मतगणना शनिवासरे अष्टमे दिनाङ्के भविष्यति। निर्वाचनायोगेन विधानसभानिर्वाचनार्थं अशीतिसहस्राधिकैकलक्षं यावत् कर्मचारिणः नियोजिताः सन्ति। मतदातून आक्रष्टुं प्रलोभनेषु विंशत्यधिकद्विशतं कोटिरूप्यकाणि, मद्यं, मादकद्रव्याणि, उपहाराणि च गृहीतानि।

## संसदीयकार्याणां मन्त्रिणा किरेनरिजिजुः इत्यनेन राहुलगान्धिनः कृता आलोचना

हिमसंस्कृतवार्ताः। संसदीयकार्याणां मन्त्री किरेन रिजिजुः एकस्मिन् सामाजिकान्तर्जालीय-सन्देशे विपक्षस्य नेतुः काङ्ग्रेसनेतुः च राहुलगान्धिनः वाक् प्राहारे उक्तवान् यत् सः अनुसूचित जाति, अनुसूचित जनजाति, अन्यपश्चवर्तिवर्ग इत्येतेषु विषयेषु चर्चा कुर्वन् अस्ति, परञ्च अन्यपश्चवर्तिवर्ग-समुदायस्य बृहत्तमं नेतृत्वं प्रधानमन्त्रिणं मोदिनं ज्ञातुं असफलः जातः।

## पूर्वलोकसभाध्यक्षस्य एम्, अनन्तशयनम् आय्यङ्गार् इत्यस्य जन्मजयन्त्यवसरे पुष्पांजलिः

हिमसंस्कृतवार्ताः। लोकसभायाः अध्यक्षः ओम बिरला इत्येषः संविधान-सदनस्य केन्द्रीय-सभागारे पूर्वलोकसभाध्यक्षस्य एम्, अनन्तशयनम् आय्यङ्गार् इत्यस्य जन्मजयन्त्यवसरे तस्मै पुष्पांजलिम् अर्पितवान्। राज्यसभायाः उपसभापतिः हरिवंशः, संसदसदस्याः, पूर्वसदस्याः तथा लोकसभायाः महासचिवः उत्पलकुमार सिंहः अपि श्री आय्यङ्गार्-वर्यं प्रति पुष्पांजलिम् अर्पितवन्तः। पूर्व लोकसभा अध्यक्ष, M.A. आय्यङ्गार इत्येषः एकः वयोवृद्धः स्वातन्त्र्ययोद्धा, प्रख्यातः संसदसदस्यः च आसीत्। सः केन्द्रीयविधानसभायाः, संविधानसभायाः, अस्थायीसंसद सदस्य, प्रथमतः तृतीयलोकसभायाः च सदस्यः आसीत्।

# भूटानदेशस्य नरेशः जिग्मे खेसर-नामग्याल- वाङ्चुकः मुख्यमन्त्रिणा सह त्रिवेणीसङ्गमे स्नानं कृतवान्



**हिमसंस्कृतवार्ताःऋचाझा।** देश-विदेशयोः प्रमुखाः जनाः गङ्गा-यमुना-सरस्वती नदीनां पवित्र-त्रिवेणीसङ्गमे आस्थापूर्णं स्नानं कुर्वन्ति। भूटानदेशस्य नरेशः जिग्मे खेसर नामग्याल वाङ्चुक इत्येषः गतप्रातः प्रयागराजं सम्प्राप्य मुख्यमन्त्रिणा योगि आदित्यनाथेन सह त्रिवेणीसङ्गमे पूजार्चनां कृतवान्। भूटाननरेशः परह्यः उत्तरप्रदेशे लखनऊनगरं सम्प्राप्तवान्। भूटानदेशस्य राजा प्रयागराजे अक्षयवटं बहद-हनुमान मन्दिरं च प्रति दर्शनार्थं गतवान्। अत्रावसरे उत्तरप्रदेशस्य मुख्यमन्त्री योगि-आदित्यनाथः अपि उपस्थितो आसीत्। भूटान-देशस्य राज्ञः एषा यात्रा भारत-भूटान-देशयोः मैत्री-सांस्कृतिक सम्बन्धान् च अधिकं सुदृढं कर्तुं महत्त्वपूर्णा अस्ति। मेलकस्य आरम्भः जनवरी-मासस्य त्रयोदश-दिनाङ्के अभवत्, अद्यावधि अष्टत्रिंशत्-कोट्यधिकाः श्रद्धालवः त्रिवेणी-सङ्गमे स्नानम् अकुर्वन्। तत्रैव महाकुम्भ-प्रयागराजे वसन्तपञ्चम्याः दिव्यं भव्यं च अमृत-स्नानं समाप्तम्। यत्र प्रयागराजस्य त्रिवेणी-सङ्गमे देशविदेशात् सहस्रशः श्रद्धालवः पवित्र स्नानम् अकुर्वन्। मेलक-प्राधिकरणेन अनुमानितं यत्, वसन्तपञ्चमी-पर्वणि प्रायः पञ्च-दशांशोत्तर-द्विकोट्यधिकाः श्रद्धालवः सङ्गम-स्नानम् अकुर्वन्। अमृत-स्नाने भागं ग्रहीतुं गतेभ्यः दिनेभ्यः लक्षोपलक्षाः श्रद्धालवः प्रयागराजं सम्प्राप्तवान्। अवधेयास्पदं वर्तते यत् प्रयागराज-रेल-मण्डलेन तीर्थयात्रिणां सुगम-आवागमनार्थं वसन्तपञ्चमी पर्वणः दिवसे षडधिकैक-शत-मेलक-विशेष रेलयानानि सफलतया प्रचालितानि।

## प्रशासनेन निर्धनानां कल्याणार्थं नैके पदक्षेपाः उत्थापिताः- लोकसभायां प्रधानमन्त्री



हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् तस्य प्रशासनेन निर्धनानां कल्याणार्थं नैके पदक्षेपाः उत्थापिताः, यस्य परिणामेन पञ्चविंशति -कोटिजनाः दारिद्र्यात् मुक्ताः जाताः। असौ अवदत् यत् अस्य प्रशासनस्य प्रतिबद्धतायाः, समर्पणस्य, परिश्रमस्य च कारणात् एतत् शक्यम् अभवत्। सः एतदपि अकथयत् यत् प्रशासनं वित्तीय-विवेकं अनुसरन् विकासाय कार्यं कुर्वन् अस्ति। प्रधानमन्त्री अद्य लोकसभायां राष्ट्रपतेः अभिभाषणस्य धन्यवाद प्रस्तावस्य चर्चायाः प्रत्युत्तरे उक्तवान्। राष्ट्रपतेः अभिभाषणस्य प्रशंसां कुर्वन्, प्रधानमन्त्री अवदत् यत् एतत् प्रेरकम् आसीत्, तथा च विकसितभारताय प्रशासनस्य प्रयत्नान् अपि शक्तिम् अददात्। प्रशासनेन कृताः उपक्रमाः प्रकाश्य, प्रधानमन्त्री अवदत् यत्, सम्पूर्णं देशे निर्धनजनेभ्यः चतुर्कोटिगृहाणि प्रदत्तानि अथ द्वादशकोटि-शौचालयाः च निर्मिताः, येन कोटिशः जनानां, विशेषरूपेण महिलानां जीवनं सरलं जातम्। प्रधानमन्त्रिणा कांग्रेसदलस्य आलोचनायाम् उक्तं यत् यस्य दलस्य त्रयः सांसदाः एकस्य सम्पन्नपरिवारस्यैव स्युः ते एसटीएससी जनानां वार्तां कुर्वन्ति एतत् अन्यायपूर्णमस्ति।

## सुभाषितम्

**कुलीनमकुलीनं वा,**
**वीरं पुरुषमानिनम्।**
**चरित्रमेव व्याख्याति,**
**शुचिं वा यदि वाशुचिम्।।**

हिन्द्यर्थः-मनुष्य के चरित्र से ही ज्ञात होता है कि वह कुलीन है या अकुलीन, वीर है या दम्भी, पवित्र है या अपवित्र।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## भारतेन संयुक्तराष्ट्रसङ्घस्य नियमितवित्त-सङ्कल्पना-पत्रस्य कृते महत्त्वपूर्णं योगदानं प्रदत्तम्



हिमसंस्कृतवार्ताः। भारतेन अस्मै वर्षाय संयुक्तराष्ट्रसङ्घस्य नियमितवित्त-सङ्कल्पनापत्रस्य कृते महत्त्वपूर्णं योगदानं प्रदत्तम्, यस्य व्ययः आहत्य षड् चत्वारि दशांशोत्तर-सप्तत्रिंशत् मिलियन अमेरिकीय-डालरमितः अस्ति। एतत् समयोचितं प्रतिदानं भारतं संयुक्तराष्ट्रसङ्घस्य प्रति स्ववित्तीय-बाध्यतां समयोचित-रूपेण पूरयितुं प्रशंसितानां पञ्चत्रिंशत्-सदस्यराष्ट्राणां एकस्मिन् विशिष्टसमूहे स्थापयति।

# हिमाचलप्रदेशे भाषा-गणितयोः शिक्षायाः स्तरः वर्धितः, शिक्षामंत्रिणे समर्पिता ASER प्रतिवेदनम्

**हिमसंस्कृतवार्ताः डॉ. पद्मनाभः शिमला।**

हिमाचलप्रदेशस्य राजकीयेषु विद्यालयेषु विद्यार्थिनां शिक्षणस्तरे उल्लेखनीयः विकासः दृष्टः। एषः निष्कर्षः प्रथम शिक्षाफाउंडेशनसंस्था द्वारा प्रकाशिते ASER 2024 प्रतिवेदने समुपस्थितः। प्रथमसंस्थायाः एतद् प्रतिवेदनं शिक्षामंत्रिणे रोहितठाकुराय समर्पितम्क अस्मिन् अवसरे समग्रशिक्षायाः राज्यपरियोजनानिदेशकः राजेश शर्मा विशेषरूपेण उपस्थितः आसीत्। शिक्षामंत्रिणा उक्तं यत् प्रदेशस्य शासनस्य प्रयासैः शिक्षायाः गुणवत्तायाः महानः विकासः जातः। सः ASER प्रतिवेदनस्य निष्कर्षान् प्रशंस्य मान्यते, तथा आगामिनि शैक्षिकसत्रे विकासात्मकं पद्धतिं स्वीकर्तुं संकल्पं कृतवान्। समग्रशिक्षानिदेशकः राजेशशर्मा अपि आश्वासयत् यत् विद्यार्थिनां शिक्षास्तरे अधिकं निदानं कर्तुं समग्रशिक्षायाः अधीनं व्यापककार्ययोजना निर्मास्यते।

## तृतीयकक्ष्यायाः विद्यार्थिनां पठने क्षमतायाः द्विगुणः विकासः

एतद् प्रतिवेदनं प्रदर्शयति यत् हिमाचलप्रदेशस्य राजकीयविद्यालयेषु विद्यार्थिनां पठने क्षमतायां विशेषः विकासः अभवत्। वर्षे २०२२ यत्र केवलं २३.० प्रतिशतं तृतीयकक्ष्यायाः बालकाः द्वितीयकक्ष्यायाः स्तरस्य पाठं पठितुं शक्ताः, अद्य २०२४ वर्षे एषः संख्या द्विगुणीभूय ४६.६ प्रतिशतं जाता। एषा सिद्धिः सम्प्रति सम्पूर्णदेशे सर्वोच्चस्थले स्थितम्।



## पञ्चमकक्ष्यायाः विद्यार्थिनां भाषा-पठने विकासः

पठनक्षमतायाः सम्बन्धे राजकीयविद्यालयानां पञ्चमकक्ष्यायाः विद्यार्थिनां अपि विशेषः विकासः दृष्टः। २०२२ तमे वर्षे ६०.२ प्रतिशतं विद्यार्थिनः द्वितीयकक्ष्यायाः स्तरस्य पाठं पठितुं शक्ताः, किन्तु २०२४ वर्षे एषः संख्या वर्धिता ६५.८ प्रतिशतं जाता।

एतेन हिमाचलप्रदेशः देशस्य शीर्षराज्येषु गण्यते।

## गणितेऽपि विद्यार्थिनां प्रदर्शनं उत्कृष्टम्

गणितविषयेऽपि हिमाचलप्रदेशस्य राजकीय-विद्यालयानां विद्यार्थिनां महत्वपूर्णा प्रगतिः दृष्टा। २०२२ तमे वर्षे तृतीयकक्ष्यायाः केवलं ३१.३ प्रतिशतं बालकाः न्यूनीकरणस्य समस्याः समाधानं कर्तुं समर्थाः, किन्तु २०२४ तमे वर्षे एषा संख्या ४६.७ प्रतिशतं जाता, यत् गतद्विवर्षाभ्यन्तरे १५.४ प्रतिशतं वृद्धिः जाता। एवमेव, पञ्चमकक्ष्यायाः विद्यार्थिनां विभाजनस्य समस्याः समाधानं कर्तुं क्षमतायामपि विकासः दृष्टः। २०२२ तमे वर्षे यत्र ३८.१ प्रतिशतं छात्राः गणितस्य भागक्रियां सम्पादयितुं समर्थाः, अद्य २०२४ तमे वर्षे एषा संख्या ४४ प्रतिशतं जाता, यत् ५.९ प्रतिशतस्य वृद्धिः।

## ASER सर्वेक्षणे हिमाचलप्रदेशस्य ११,४२१ बालकाः सम्मिलिताः

प्रथमसंस्थाद्वारा सञ्चालिते ASER सर्वेक्षणे २०२४ तमे वर्षे सितम्बर-अक्टूबरमासयोः सम्पूर्णदेशस्य ६०५ जनपदानां ग्रामीणक्षेत्रे ३-१६ वर्षवयस्काः ६,४९,४९१ बालकाः सम्मिलिताः। तत्र हिमाचलप्रदेशे ११,४२१ बालकाः भागं गृहीतवन्तः। एतद् प्रतिवेदनम् अस्मिन् प्रदेशे विद्यालयेषु आधारभूतसुविधासु अपेक्षितः संशोधनम् अपि जातम् इति निर्दिशति।

# International Shivratri Fair Mandi: बड़ादेवकामरुनागः निमन्त्रणं प्राप्तवान्, २५ फरवरी दिनाङ्के भव्यसमागमः



**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।**

मण्डी-जनपदस्य अन्ताराष्ट्रीय- महाशिवरात्रि- मेला- उद्घाटनार्थम् उपायुक्तस्य निमन्त्रणं बड़ादेवकामरुनागः प्राप्तवान्। २५ फरवरी दिनाङ्के मण्डीनगरे देवकमरुनागस्य राजदेवतामधोरायस्य च भव्यसमागमानन्तरं महाशिवरात्रिमहोत्सवस्य कार्याणि औपचारिकरूपेण आरभ्यन्ते। देवता कदा स्वनिवासस्थानात् मण्डीनगरं प्रति गमिष्यति इति मन्दिरसमित्या अद्यापि तिथिः न निर्धारिता। महाशिवरात्रि मेला यावत् बड़ादेवकामरुनागः मण्डी न प्राप्नोति तावत् न आरभ्यते। बड़ादेवस्य परिचर्याकर्तृभिः मण्डीमहाशिवरात्रेः सज्जता आरब्धा अस्ति। देवस्य गुरुदेवीसिंहः कटवालः कहानसिंहठाकुरः च २५ फरवरी दिनाङ्के मण्डीनगरे देवस्य आगमनस्य पुष्टिं कृतवन्तौ। देवतायाः मण्डीनगरं प्राप्तुं सप्ताहाधिकं समयः भवति।
जहलतः मण्डीपर्यन्तं विभिन्नेषु स्थानेषु अस्य देवतायाः भव्यं स्वागतं भवति। २५ फरवरी दिनाङ्के उपायुक्तः मण्डी बड़ादेवस्य स्वागतं पुलघराटे करिष्यति। तदनन्तरं मण्डीनगरे मण्डीराज्यस्य राजपरिवारेण अस्य देवतायाः स्वागतं भविष्यति। देवकमरुनागस्य भगवतः माधोरायेन सह मेलनेन महाशिवरात्रिः आरभ्यते।

## एकमासपर्यन्तं भविष्यति आतिथ्यकालः

आतिथ्यकाले देवकमरुनागः मण्डीमण्डले प्रायः एकमासपर्यन्तं तिष्ठति। शिवरात्रिमेलायां देवता भक्तानां गृहेषु गत्वा आशीर्वादं ददाति। महाशिवरात्रिमेलायां भगवान् कामरुनागः टारनामन्दिरे एकान्ते निवसति। अन्ये सर्वे देवाः पड्डलभूमौ निवसन्ति।

# जयरामठाकुरः - हिमाचले रेलपरियोजनासु गतेः अभावस्य उत्तरदायी सुक्खुसर्वकारः

**हिमसंस्कृतवार्ताः - शिमला।**



विपक्षनेता जयरामठाकुरः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे केन्द्रसर्वकारः हिमाचलप्रदेशस्य रेलमार्गपरियोजनानां कृते प्रचुरं बजटं ददाति येन हिमाचलप्रदेशस्य रेलजालं यथासम्भवं सुदृढं विस्तारं च कर्तुं शक्यते। हिमाचलप्रदेशस्य रेलजालेन सह सम्पर्कः हिमाचलप्रदेशस्य विकासे महत्त्वपूर्णां भूमिकां निर्वहति। हिमाचलप्रदेशस्य रेलपरियोजनानां महत्त्वं प्रचुरं बजटं च दातुं प्रधानमन्त्रिणे नरेन्द्रमोदिने, भाजपादलस्य राष्ट्रीयाध्यक्षाय केन्द्रीयस्वास्थ्यमन्त्रिणे जगतप्रकाशनड्डावर्याय च, रेलमन्त्रिणे अश्विनीवैष्णवाय, सर्वेभ्यः केन्द्रीयनेतृभ्यः च असौ धन्यवादं दत्तवान्।
जयरामठाकुरः अवदत् यत् अस्मिन् समये हिमाचलप्रदेशस्य त्रयाणां रेलमार्गपरियोजनानां कृते केन्द्रसर्वकारेण २७१६ कोटिरूप्यकाणां बजटं दत्तम् अस्ति। यत् गतवर्षस्य बजटात् अधिकम् अस्ति। अस्मिन् समये बजटे हिमाचलप्रदेशे चत्वारि रेलस्थानकानि निर्मीयन्ते। केन्द्रसर्वकारः हिमाचलप्रदेशस्य रेलमार्गपरियोजनानां कृते निरन्तरं पूर्णसमर्थनं ददाति।
हिमाचलप्रदेशे रेलपरियोजनासु गतिहीनतायाः उत्तरदायी काङ्ग्रेसस्य सुक्खुसर्वकारः अस्ति। रेलवेतः पुनः पुनः अनुरोधाः पत्राणि च प्राप्य अपि सुक्खुसर्वकारः हिमाचलप्रदेशस्य १६२६ कोटिरूप्यकाणां भागं रेलवेमण्डलाय न ददाति। यस्य कारणात् एकतः हिमाचले रेलसंपर्कस्य विस्तारे विलम्बः भवति अपरतः च तासां परियोजनानां व्ययः वर्धमानः अस्ति वयं मुख्यमन्त्रिणः आग्रहं कुर्मः यत् हिमाचलप्रदेशस्य रेलमार्गपरियोजनानां त्वरिततायै हिमाचलसर्वकारस्य निर्धारितभागं यथाशीघ्रं मुक्तं करोतु। जयरामठाकुरेण उक्तं यत् सामरिकरूपेण महत्त्वपूर्णानां भनुपल्ली-बिलासपुर-बैरी, नङ्गलबांध-तलवाड़ा चण्डीगढ-बद्दी रेलमार्गाणां निर्माणार्थं बजटस्य कोऽपि अभावः नास्ति।

केन्द्रसर्वकारेण २०२४-२५ वर्षस्य अन्तरिमबजटे हिमाचलस्य रेलमार्गत्रयस्य कृते २५०० कोटिरूप्यकाणां प्रावधानं कृतम् आसीत् । तेषु अधिकतमं १७०० कोटिरूप्यकाणि भनुपल्ली-बिलासपुर-बैरी-रेलमार्गाय दत्तानि । नङ्गल-जलबन्ध-तलवाड़ायाः कृते ५०० कोटिरूप्यकाणि, चण्डीगढ-बद्दीक्षेत्राय च ३०० कोटिरूप्यकाणि दत्तानि । २०२३-२४ तमस्य वर्षस्य बजटे भनुपल्ली-बिलासपुर-बैरी-रेलमार्गस्य एकसहस्रकोटिरूप्यकाणां बजट प्राप्तम्, परन्तु तस्य व्ययस्य विचारेण १३९९ कोटिरूप्यकाणां कृते संशोधनं कृतम् अस्ति । नङ्गलजलबन्ध-तलवाड़ायाः कृते गतबजटे ४५० कोटिरूप्यकाणि प्राप्तानि आसन्, चण्डीगढ-बद्दीक्षेत्राय अपि गतबजटे ४५० कोटिरूप्यकाणि प्राप्तानि आसन्। अधुना एतेषु त्रयेषु रेलमार्गेषु कार्यं अधिकं गतिं प्राप्स्यति यतः तेषां कृते बजटस्य प्रावधानं कृतम् अस्ति। हिमाचले ६३ किलोमीटर दीर्घस्य भनुपल्ली-बिलासपुर-रेलमार्गस्य, ८४ किलोमीटरदीर्घस्य नङ्गलजलबन्ध-तलवाड़ा, ३३ किलमीटरदीर्घस्य बद्दी-चण्डीगढ-रेलमार्गस्य कार्याणि प्रचलन्ति। एतत् कार्यं तदा अधिकं गतिं प्राप्स्यति यदा हिमाचलप्रदेशसर्वकारः एतेषु परियोजनासु पूर्वनिर्धारितं भागं दास्यति।

# CM Sukhu : पूर्वसर्वकारः नूतनानां संस्थानां उद्घाटने केन्द्रितः आसीत्, परन्तु सुविधाः न प्रदत्ताः




**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः विधायकप्राथमिकतासभायाः द्वितीयदिवसस्य प्रथमसत्रे शिमला-मण्डीजनपदयोः विधायकानां प्राथमिकताविषये चर्चां कृतवान्। मुख्यमन्त्री उक्तवान् यत् विधायकैः भविष्यस्य आह्वानानां अनुरूपं परामर्शाः दातव्याः, येन हिमाचलप्रदेशः आत्मनिर्भरः भवितुम् अर्हति। सः अवदत् यत् बजटे विधायकानां परामर्शानां कृते प्राधान्यं भविष्यति। विधायकाः जनैः निर्वाचिताः भवन्ति अतः ते जनानां समस्यानां विषये अवगताः भवन्ति। मुख्यमंत्री सुखविन्दरसिंहसुक्खुः अवदत् यत् वर्तमानस्य राज्यसर्वकारस्य शिक्षा- स्वास्थ्यक्षेत्रेषु विशेषं ध्यानं वर्तते। विगतवर्षद्वये राज्यसर्वकारेण एतयोः क्षेत्रयोः उन्नयनार्थं अनेकानि पदानि कृतानि, आगामिसमये अधिकानि परिवर्तनानि भविष्यन्ति। सः अवदत् यत् पूर्वं राजनैतिकलाभानां कृते नूतनानां संस्थानां उद्घाटनस्य विषये बलं दत्तं किन्तु संस्थासु सुविधाः प्रदातुं तान् सुदृढं कर्तुं च कोऽपि ध्यानं न कृतम्, यस्मात् कारणात् अद्यत्वे
सुविधानां स्तरः पतितः अस्ति। सः अवदत् यत् वर्तमानराज्यसर्वकारः स्वास्थ्यक्षेत्रे नूतनप्रौद्योगिक्याः उपयोगाय प्रयत्नान् कुर्वन् अस्ति। एतेन सह रिक्तपदानां पूरणस्य प्रक्रिया अपि प्रचलति, येन जनाः सुविधां प्राप्नुवन्ति। सः अवदत् यत् राज्यसर्वकारेण कृतानि पदानि आगामिषु समये सकारात्मकं परिणामं दर्शयिष्यन्ति। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः नीतिपरिवर्तनं आनयन् हिमाचलप्रदेशस्य प्राकृतिकसौन्दर्यानुरूपं उद्योगानां प्रचारं करोति। राज्ये पर्यटनं, दुग्धं, सूचनाप्रौद्योगिकी, विवरण-भण्डारणं, खाद्य-प्रक्रियाकरणं च इत्यादयः अन्ये हरित-उद्योगाः प्रचारिताः सन्ति। सः अवदत् यत् रोहड़ू- चिडगांव-मार्गस्य स्थितिः सुदृढा भविष्यति। तेन सह कुरपनपेयजलयोजनायाः आरम्भार्थं धनं प्रदत्तं भविष्यति। २०२५ तमस्य वर्षस्य अप्रैल-मासस्य ३० दिनाङ्कपर्यन्तम् एतां योजनां सम्पन्नं कर्तुं जलशक्तिविभागाय निर्देशं दत्तवान्। सः कृषिवनविभागं गगरेटे वंश-आधारित-उद्योगस्य स्थापनायाः सम्भावनाः अन्वेष्टुं निर्देशितवान्।


# Himachal News : माताश्रीनैनादेव्याः दर्शनार्थं प्राप्ता अभिनेतुः गोविन्दा-इत्यस्य पत्नी, स्वपुत्र्या सह पूजां कृतवती



**हिमसंस्कृतवार्ताः - श्री नयना देवी जी।**
मंगलवासरे बालिवुडस्य प्रसिद्धस्य अभिनेतुः गोविन्दा-इत्स्य पत्नी सुनीता आहुजा स्वपुत्र्या टीना आहूजया सह मातुः दर्शनं कर्तुं प्रसिद्धं शक्तिपीठं माताश्रीनैनादेवीं प्राप्तवती। सः मातुः चरणौ प्रणम्य स्वस्य परिवारस्य च सुखसमृद्धिं प्रार्थितवती । मन्दिरस्य पुरोहितः अमितकुमारः सुनीता आहूजा तस्याः पुत्र्या सह पूजाविधिं कारितवान् । प्राचीने हवनकुण्डे च यज्ञं कृतम् । पुरोहितः अमितशर्मा माताश्रीनैनादेव्याः इतिहासस्य, चमत्कारस्य तथा मन्दिरे आयोज्यमानानां धार्मिककार्यक्रमाणां विषये विस्तृत सूचनां दत्तवान्।सुनीता आहुजायाः स्वागतं मन्दिरन्यासेन मातुः वस्त्र प्रसादं च दत्त्वा अभवत् । तस्यै स्मृतिचिह्नमपि प्रदत्तम् ।
सुनीता आहूजा वार्तालापस्य समये अवदत् यत् सा प्रतिवर्षं माता चिन्तापूर्णी, ज्वाला जी, ब्रजेश्वरी मन्दिरं च गच्छति स्म, परन्तु माताश्रीनैनादेवीजी इत्यस्य दर्शनं सर्वदा स्मरति स्म। अस्मिन् समये सा माताश्री नैना देवी जी इत्यस्य दर्शनेन स्वयात्राम् आरब्धवती, येन सा मातुः आशीर्वादं प्राप्नुयात्, भविष्ये सर्वाः तीर्थयात्राः अपि शुभाः भविष्यन्ति। सुनीता आहुजा मातृचरणयोः विधिपूर्वकं पूजां कृत्वा स्वपरिवारस्य सुखसमृद्धिं प्रार्थितवती

# हरियाणाराज्ये आभासीयं सम्भाषणशिबिरम् आयोजितम्

संस्कृतभारती, हरियाणा (न्यासः) द्वारा 25 जनवरीतः 03 फरवरी 2025 पर्यन्तम् ऑनलाइन-संस्कृतसम्भाषणशिबिरस्य आयोजनं कृतमासीत्। शिबिरस्य समयः 06:00 तः 08:00 पर्यन्तम् आसीत्। शिबिरं गूगलमीट इति माध्यमेन आसीत्। शिबिरे अस्मिन् 70 अधिकाः सामाजिकाः उपस्थिताः आसन्। अस्य शिबिरस्य प्रशिक्षकौ देवांशकृष्णपवनमिश्रौ आस्ताम्। फरवरीमासस्य 03 दिनाङ्के सायं 06:30 वादने एतस्य शिबिरस्य समारोपकार्यक्रमः अभवत्। समारोपकार्यक्रमे मुख्यवक्तारूपेण डॉ. जोगिन्द्रः (उत्तरक्षेत्रसम्पर्कप्रमुखः, संस्कृतभारती), प्रान्तपक्षतः भूपेन्द्रः (प्रान्तसहमन्त्री, संस्कृतभारती) उपस्थिताः आसन्। डॉ. जोगिन्द्रमहोदयः उक्तवान् यत् अधुना



अस्माभिः संस्कृतसम्भाषणं पठितम् अधुना समयः अस्ति एतस्य संस्कृतसम्भाषणस्य अभ्यासस्य। अभ्यासः न भविष्यति चेत् सम्भाषणं गमिष्यति। अस्माभिः प्रतिदिनम् अभ्यासः करणीयः एव। कार्यक्रमस्य संचालनं नवीनकौशलः (विभागसंघटनमन्त्री, हिसारम्) कृतवान्। कार्यक्रमे प्रान्तविभागजनपदजनाः अपि उपस्थिताः आसन्।

# कृषिक्षेत्रे अनियमिततां भ्रष्टाचारविरुद्धं च उचितं कार्याचरणम् भविष्यति- कृषिमन्त्रीशिवराजसिंहचौहानः



हिमसंस्कृतवार्ताः। केन्द्रीय कृषिमन्त्री शिवराजसिंह चौहानः आश्वासितवान् यत् प्रशासनं कृषिक्षेत्रे अनियमिततां न स्वीकरिष्यति इति भ्रष्टाचारविरुद्धं उचित कार्याचरणम् भविष्यति। लोकसभायां प्रश्नकाले तेन इदमुक्तम्। महाराष्ट्रस्य कृषिविभागे पञ्चसहस्र-कोटिरूप्यकाणां भ्रष्टाचारस्य आरोपानाम् उत्तरं प्रददन् मन्त्री एनसीपी-नेतुः सुप्रिया सुले इत्यस्याः उत्तरं ददाति स्म। श्रीचौहानः अवदत् यत् यदि किमपि अनियमितं दृश्यते तर्हि अन्वेषणं भविष्यति, दोषिणः विरुद्धं उचितकार्याचरणं भविष्यति। कृषिमन्त्री कृषकाणाम् आयवर्धनाय प्रधानमन्त्रिणः नरेन्द्रमोदिनः प्रतिबद्धतायां बलं दत्तवान्।

# चीनदेशः अमेरिकादेशस्य उत्पादेषु प्रतीकार-शुल्कं आरोपयिष्यति- चीनदेशस्य वाणिज्यमन्त्रालयः



हिमसंस्कृतवार्ताः। अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन चीनदेशस्य वस्तुषु आरोपितस्य दश-प्रतिशत मितस्य शुल्कस्य प्रतिक्रियारूपेण चीनदेशः प्रतिकारोपायान् अघोषयत्। चीनदेशस्य वाणिज्यमन्त्रालयः अवदत् यत् सः अमेरिकादेशस्य उत्पादेषु प्रतीकार-शुल्कं आरोपयिष्यति। प्रतिकारोपायेषु अमेरिका-देशात् अङ्गारस्य, द्रवीकृत-प्राकृतिकवातेः च आयातेषु पञ्चदशप्रतिशतं यावत् करः सम्मिलितो वर्तते। अशोधित-तैलेषु, कृषि यन्त्रेषु, बृहत्-यन्त्र-कारयानेषु च दशप्रतिशतमितं शुल्कं भविष्यति। अद्यारभ्य चीनदेशस्य आयातेषु शुल्कवृद्धेः अनन्तरम् एव एतत् कार्यम् अभवत्। एतदतिरिच्य, बीजिङ्ग्-देशः अमेरिकादेशस्य गूगल्-संस्थायाः विरुद्धं अन्वेषणाय घोषणां कृतवान्। इतः प्राक्, सीमा-सुरक्षा-प्रयत्नान् सुदृढं कर्तुं द्वयोः प्रतिवेशि-देशयोः सहमत्यानन्तरम् अमेरिकादेशस्य राष्ट्रपतिः, कनाडा-मैक्सिको-देशयोः अमेरिकादेशेन आरोपित-शुल्कवृद्धौ एकमासस्य विलम्बस्य घोषणाम् अकरोत्।

**हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्**

## सामान्यज्ञानम्*

प्रश्नः 1. विदर्भ- क्रिकेट- संघ- क्रीडाङ्गणम् (क्रिकेट) कुत्र अस्ति?
उत्तरम् : नागपुरे (महाराष्ट्रे)
प्रश्नः 2. 'यमकभरतम्' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'आनन्दतीर्थः'।
प्रश्नः 3. 'तस्मै इदम्' इत्यस्य समस्त पदं किम्?
उत्तरम्- तदर्थम्। (चतुर्थीतत्पुरुषः)
प्रश्नः 4. 'अधोगतिः' इत्यस्य सन्धि- विच्छेदं कुरुत-
उत्तरम्- 'अधः + गतिः'।
प्रश्नः 5. "कृष्णः सागरः" कस्मिन् महाद्वीपे अस्ति?
उत्तरम् – यूरोपमहाद्वीपे।

## स्वस्तिश्रीमाघ शुक्लपञ्चमी



आराधयन्ति सुधियो मधुरैर्वचोभिः
कण्ठे विराजयितुमद्भुतशुभ्रशोभाम् ।
किन्त्वेष देवि ! सरलो बहिरन्तरात्मं
त्वां रोमरोमरुचिरां हृदि भावयामि ॥

एकं स्मितं तव सरस्वति ! शुभ्रशोभं
लोकत्रये शशिसहस्ररुचिं बिभर्ति ।
तेन स्मितेन सपदि स्पृशती जडश्रि
चेतो ममापि करुणे ! कुरु चन्द्रकान्तम् ॥
पद्मश्रियोऽङ्गलिभिरश्रमजित्वरीभि-
झङ्कारमात्रपरिमोहितविश्ववृत्ते !
वीणानिनादिनि ! मनोऽपि मम क्षणेन
तन्त्रीमिव स्पृशसि चेत् स्पृहये न मुक्तिम् ॥


**प्रो. सतीश कुमार कपूरः**

# ।। श्रीरामायणकथा ।।

### उत्तरकाण्डम्!(त्रिषष्टितमः सर्गः)

### रामस्य समीपं ब्रह्मर्षेः गार्ग्यस्य आगमनम्।

अथ एकदा केकयस्य राजा युधाजित् महात्मने राघवाय अनुत्तमं प्रीतिदानं प्रदातुं स्वगुरुम् अङ्गिरसः पुत्रम् अमितप्रभं ब्रह्मर्षिं गार्ग्यम् अप्रेषयत्। राजा युधाजित् रामाय अश्वानां दशसहस्राणि, कम्बलानि, रत्नानि, चित्रवस्त्राणि, शुभानि आभरणानि च अददात्। महर्षिं गार्ग्यम् आगतं श्रुत्वा सहानुजः रामः क्रोशमात्रं प्रत्युद्गम्य देवराजः बृहस्पतिं यथा रामः महर्षिं गार्ग्यं समपूजयत्। एवं तमृषिं सम्पूज्य तद्धनं च प्रतिगृह्य मातुलस्य सर्वं कुशलम् अपृच्छत्। ततः उपविष्टं तमृषिं रामः पुनः प्रष्टुम् आरभत। हे भगवन्! मम मातुलः किं वाक्यमब्रवीत् यदर्थं वाक्यविदां श्रेष्ठः साक्षाद् वृहस्पतिः इह सम्प्राप्तः। राघवस्य भाषितं श्रुत्वा महर्षिः गार्ग्यः अद्भुतसङ्काशं वाक्यं वक्तुम् आरभत हे महाबाहो! तव मातुलः प्रीतिसंयुक्तं वाक्यम् अब्रवीत्। यदि तुभ्यं रोचते तर्हि श्रूयताम्।महर्षिः गार्ग्यः अब्रवीत्- अयं गन्धर्वविषयः फलमूलोपशोभितः सिन्धुनदीम् उभयतः परमशोभनः देशः विद्यते। तं देशं तिस्रः कोट्यः महाबलाः सायुधाः युद्धकोविदाः गन्धर्वाः रक्षन्ति। हे काकुत्स्थ! तान् गन्धर्वान् विनिर्जित्य तद् गन्धर्वनगरं स्वे पुरे निवेशय। हे महाबाहो! एतद् रोचताम्। अहं त्वाम् अहितं न वदामि। अन्यस्य कृते एतत् कर्म दुःसाध्यं किन्तु त्वमिच्छसि चेत् अनायासेन तत् कर्तुं शक्ष्यसि।



महर्षेः मुखात् मातुलस्य तद् वचनं श्रुत्वा प्रीतः राघवः भरतं निरीक्ष्य महर्षिम् अब्रवीत् बाढम्। इत्येव भवतु। सः प्रीतः राघवः प्राञ्जलिर्भूत्वा द्विजम् अब्रवीत् हे ब्रह्मर्षे! इमौ वीरौ कुमारौ तक्षः पुष्कलः च भरतात्मजौ तं देशं विचरिष्यतः। एतौ उभावपि सबलानुगौ भरतम् अग्रतः कृत्वा मातुलस्य साहाय्यं कर्तुं तत्र गत्वा गन्धर्वान् निहत्य भरतः द्वे पुरे विभजिष्यतः। ततः भरतः आत्मजौ तत्र निवेश्य पुनः सः धार्मिकः भरतः मम सकाशम् आगमिष्यति। रामचन्द्रः ब्रह्मर्षिम् एवमुक्त्वा सबलानुगं भरतम् आदिशत्, कुमारौ च अभ्यषेचयत्। ततः सौम्येन नक्षत्रेण अङ्गिरसः पुत्रं ब्रह्मर्षिं गार्ग्यं पुरस्कृत्य ससैन्यः भरतः पुत्राभ्यां सह निरगच्छत्। सुरैरपि दुराधर्षा रामस्य सा सेना तदा भरतम् अनुगच्छति स्म। ततः मांसाशिनः सत्त्वाः सुमहान्तः राक्षसाः रुधिरस्य पिपासया भरतम् अनुगच्छन्ति स्म। सिंहव्याघ्रवराहाणां पक्षिणां खेचराणां बहूनि सहस्राणि, गन्धर्वपुत्रमांसानि भोक्तुकामाः बहवः सुदारुणाः मांसभक्षाः भूतग्रामाः च भरतम् अनुगच्छन्ति स्म। एवं हृष्टपुष्ट-जनाकीर्णा सा सेना अर्द्धमासं पथि उषिता केकयं समुपागमत्।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

## ।।ॐ।।

### "वन्दे संस्कृतमातरम्"

### "लौकिकन्यायकोशः"

### "अपराह्णछायान्यायः"

अपराह्णतः अर्थात् मध्याह्नात् सन्ध्यासमयं यावत् छाया क्रमेण वर्धते। दुष्टैः सह मैत्री कृता चेत् सा आदौ अतीव गहना भवति परं क्रमेण सा न्यूना भवति। सज्जनैः तु कृता मैत्री आरम्भे लघ्वी भवति चेदपि क्रमेण वर्धते। अस्य न्यायस्य अयमभिप्रायः। दृष्टव्यम्-

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा
वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री
खलसज्जनानाम्।।
(भर्तृहरिनीतिशतके ४९)

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

### हिसारस्य राजकीयमहाविद्यालये सम्भाषणशिबिरम् आरब्धम्



हिमसंस्कृतवार्ताः- सोमा, शिविरसहशिक्षिका, (महाविद्यालय-शिक्षणप्रमुखा)संस्कृतभारती, हरियाणा-प्रान्तद्वारा हिसारजनपदे छाजूराम-शिक्षणमहाविद्यालये संस्कृत- सम्भाषण-शिबिरम् आयोजितम् अस्ति। इदं शिबिरं 11-02-2025 दिनाङ्कं यावत् भविष्यति। अस्य शिबिरस्य उद्घाटनसत्रे मुख्यवक्ता मान्यः राजबीरमहोदयः आसीत्। अध्यक्षत्वेन डॉ. उर्मिला मलिक आसीत्। उद्घाटनसत्रे अस्मिन् आहत्य 28 जनाः आसन् तेषु बालकाः 7, बालिकाः 17 शिक्षिकाः 4 चासन्। शिबिरशिक्षकः नवीनकौशलः हिसारविभागसंघटन मन्त्री वर्तते।

# भारतस्य संगीतपरम्परा



हिन्दू धर्मस्य नृत्यं, कलायाः, योगस्य, संगीतस्य च गाढः सम्बन्धः अस्ति। हिन्दू धर्मः ध्वनिं च शुद्धं प्रकाशं च ब्रह्माण्डस्य सृष्ट्याः कारणं मन्यते। आत्मा एव अस्य विश्वस्य कारणम्। चतुर्षु वेदेषु, स्मृतिषु, पुराणेषु, गीता- आदिधर्मग्रन्थेषु धर्म- अर्थ- काम- मोक्षं च साधयितुं सहस्रशः उपायाः निर्दिष्टाः सन्ति। तेषु उपायेषु कश्चन प्रमुखः उपायः संगीतः। संगीतस्य कोऽपि भेदः नास्ति। संगीतम् आत्मनः समीपतमं मन्यते।

### प्राचीनापरम्परा

भारते संगीतस्य परम्परा अनादिकालात् अस्ति। हिन्दूनां सर्वेषां देवताः स्वस्वं वाद्ययन्त्रं धारयन्ति। विष्णोः शङ्खः, शिवार्थं डमरुः, नारदस्य च सरस्वत्याः च वीणा, कृष्णस्य वंशी च। खजुराहो-मन्दिरेषु, कोणार्क-मन्दिरेषु च प्राचीन-मन्दिराणां भित्तिषु गन्धर्वाणां मूर्तयः अङ्किताः। तेषु मूर्तिषु सर्वेषां वाद्ययन्त्राणां वर्णनं दृश्यते। गन्धर्वाणां किन्नराणां च संगीतं विशेषज्ञं मन्यते।

### सामवेदः- संगीतस्य आधारः

सामवेदः वेदेषु चतुर्षु गेय-ऋचां संग्रहः अस्ति। भरतमुनिना सामवेदम् आधारं कृत्वा नाट्यशास्त्रं रचितम्। ततः संगीतरत्नाकरः, अभिनवरागमञ्जरी च निर्मिता। सामवेदः विश्वसंगीतग्रन्थानाम् प्रेरणास्रोतः अस्ति।

**संगीतस्य विज्ञानम्-**

हिन्दूधर्मे संगीतं मोक्षप्राप्तये साधनं मन्यते। संगीतं चित्तं मस्तिष्कं च शान्तं स्वस्थं च करोति। भारतीय-ऋषिभिः प्रकृतौ पूर्वमेव विद्यमानाः ध्वनयः अन्वेषिताः। तेषां ध्वन्याधारेण मन्त्राः संस्कृत-भाषा ध्यानध्वनयः च रचिता।

### प्राचीन-भारतीय-संगीतः

भारतीयसंगीतस्य द्वौ मुख्यौ प्रकारौ सन्ति- मार्गी च देशी च। मार्गीसंगीतः लुप्तः, किन्तु देशीसंगीतः विकसितः। देशीसंगीतः शास्त्रीयसंगीतः लोकसंगीतः च द्विधा विभक्तः।

### वर्तमानकालीनसंगीतपद्धत्यः-

वर्तमानकाले हिन्दुस्तानीसंगीतः, कर्नाटकीसंगीतः च प्रचलितौ। हिन्दुस्तानीसंगीतः मुगलशासनस्य छायायांविकसितः। कर्नाटकीसंगीतः दक्षिणभारतस्य मन्दिरेषु।

## वाद्ययन्त्राणि-



भारते प्राचीनकाले वीणा, डमरुः, मृदङ्गः, बांसुरी, नगाडाः इत्यादीनि वाद्ययन्त्राणि प्रचलितानि। प्रत्येकं वाद्ययन्त्रं धर्म-कर्मणोः विशेषस्थानं धारयति।

## प्रमुख-वाद्ययन्त्राणि

१. घण्टाः- घण्टायाः ध्वनिः ब्रह्माण्डीय-नादं प्रतिनिविशति।
२. शङ्खः- शङ्खस्य नादः नादब्रह्मरूपेण पूज्यः।
३. वंशी (बांसुरी)- श्रीकृष्णायाः प्रियं वाद्ययन्त्रं।
४. वीणाः- वीणा ज्ञानं शान्तिं च प्रतिनिविशति।
५. ढक्का (डमरुः)- ढक्का शिवस्य प्रमुखं वाद्ययन्त्रम्।

## निष्कर्षः-

हिन्दूधर्मे संगीतस्य वाद्ययन्त्राणां च पवित्रं स्थानम् अस्ति। एतानि वाद्ययन्त्राणि ध्वन्याधिष्ठितानि चित्तं शुद्धं करन्ति। भारतस्य प्राचीनसंगीतं चिरकालपर्यन्तं प्रेरणास्रोतः भविष्यति।

sudha_sathaye@yahoo.com